श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ अष्टाधिकशततमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ अष्टाधिकशततमः सर्गः ॥

## भ्रातृभिः कपिभिरृक्षैश्च सह परमधाम गन्तुं श्रीरामस्य निश्चयो विभीषणं हनुमन्तं जाम्बवन्तं मैन्दं द्विविदं च प्रति भूतल एव स्थातुं तस्यादेशः

ते दूता रामवाक्येन चोदिता लघुविक्रमाः।
प्रजग्मुर्मधुरां शीघ्रं चक्रुर्वासं न चाध्वनि ॥ **7.108.1** ॥

ततस्त्रिभिरहोरात्रैः सम्प्राप्य मधुरामथ।
शत्रुघ्नाय यथातत्त्वमाचख्युः सर्वमेव तत् ॥ **7.108.2** ॥

लक्ष्मणस्य परित्यागं प्रतिज्ञां राघवस्य च।
पुत्रयोरभिषेकं च पौरानुगमनं तथा ॥ **7.108.3** ॥

कुशस्य नगरी रम्या विन्ध्यपर्वतरोधसि।
कुशावतीति नाम्ना सा कृता रामेण धीमता ॥ **7.108.4** ॥

श्रावस्तीति पुरी रम्या श्राविता च लवस्य ह।
अयोध्यां विजनां कृत्वा राघवो भरतस्तथा ॥ **7.108.5** ॥

स्वर्गस्य गमनोद्योगं कृतवन्तौ महारथौ।
एवं सर्वं निवेद्याशु शत्रुघ्नाय महात्मने ॥ **7.108.6** ॥

विरेमुस्ते ततो दूतास्त्वर राजेति चाब्रुवन्।
तच्छ्रुत्वा घोरसङ्काशं कुलक्षयमुपस्थितम् ॥ **7.108.7** ॥

प्रकृतीस्तु समानीय काञ्चनं च पुरोधसम्।
तेषां सर्वं यथावृत्तमब्रवीद् रघुनन्दनः॥ **7.108.8** ॥

आत्मनश्च विपर्यासं भविष्यं भ्रातृभिः सह।
ततः पुत्रद्वयं वीरः सोऽभ्यषिञ्चन्नराधिपः॥ **7.108.9** ॥

सुबाहुर्मधुरां लेभे शत्रुघाती च वैदिशम्।
द्विधा कृत्वा तु तां सेनां माधुरीं पुत्रयोर्द्वयोः।
धनं च युक्तं कृत्वा वै स्थापयामास पार्थिवः॥ **7.108.10** ॥

सुबाहुं मधुरायां च वैदिशे शत्रुघातिनम्।
ययौ स्थाप्य तदायोध्यां रथेनैकेन राघवः॥ **7.108.11** ॥

स ददर्श महात्मानं ज्वलन्तमिव पावकम्।
सूक्ष्मक्षौमाम्बरधरं मुनिभिः सार्धमक्षयैः॥ **7.108.12** ॥

सोऽभिवाद्य ततो रामं प्राञ्जलिः प्रयतेन्द्रियः।
उवाच वाक्यं धर्मज्ञं धर्ममेवानुचिन्तयन्॥ **7.108.13** ॥

कृत्वाभिषेकं सुतयोर्द्वयो राघवनन्दन।
तवानुगमने राजन् विद्धि मां कृतनिश्चयम्॥ **7.108.14** ॥

न चान्यदद्य वक्तव्यमतो वीर न शासनम्।
विहन्यमानमिच्छामि मद्विधेन विशेषतः॥ **7.108.15** ॥

तस्य तां बुद्धिमक्लीबां विज्ञाय रघुनन्दनः।
बाढमित्येव शत्रुघ्नं रामो वाक्यमुवाच ह॥ **7.108.16** ॥

तस्य वाक्यस्य वाक्यान्ते वानराः कामरूपिणः।
ऋक्षराक्षससङ्घाश्च समापेतुरनेकशः॥ **7.108.17** ॥

सुग्रीवं ते पुरस्कृत्य सर्व एव समागताः।
तं रामं द्रष्टुमनसः स्वर्गायाभिमुखं स्थितम्॥ **7.108.18** ॥

देवपुत्रा ऋषिसुता गन्धर्वाणां सुतास्तथा।
रामक्षयं विदित्वा ते सर्व एव समागताः॥ **7.108.19** ॥

ते राममभिवाद्योचुः सर्वे वानरराक्षसाः।
तवानुगमने राजन् सम्प्राप्ताः स्म समागताः॥ **7.108.20** ॥

यदि राम विनास्माभिर्गच्छेस्त्वं पुरुषोत्तम।
यमदण्डमिवोद्यम्य त्वया स्म विनिपातिताः॥ **7.108.21** ॥

एतस्मिन्नन्तरे रामं सुग्रीवोऽपि महाबलः।
प्रणम्य विधिवद् वीरं विज्ञापयितुमुद्यतः॥ **7.108.22** ॥

अभिषिच्याङ्गदं वीरमागतोऽस्मि नरेश्वर।
तवानुगमने राजन् विद्धि मां कृतनिश्चयम्॥ **7.108.23** ॥

तस्य तद् वचनं श्रुत्वा रामो रमयतां वरः।
वानरेन्द्रमथोवाच मैत्रं तस्यानुचिन्तयन्॥ **7.108.24** ॥

सखे शृणुष्व सुग्रीव न त्वयाहं विनाकृतः।
गच्छेयं देवलोकं वा परमं वा पदं महत्॥ **7.108.25** ॥

तैरेवमुक्तः काकुत्स्थो बाढमित्यब्रवीत् स्मयन्।
विभीषणमथोवाच राक्षसेन्द्रं महायशाः॥ **7.108.26** ॥

यावत् प्रजा धरिष्यन्ति तावत् त्वं वै विभीषण।
राक्षसेन्द्र महावीर्य लङ्कास्थः स्वं धरिष्यसि॥ **7.108.27** ॥

यावच्चन्द्रश्च सूर्यश्च यावत् तिष्ठति मेदिनी।
यावच्च मत्कथा लोके तावद् राज्यं तवास्त्विह॥ **7.108.28**॥

शासितश्च सखित्वेन कार्यं ते मम शासनम्।
प्रजाः संरक्ष धर्मेण नोत्तरं वक्तुमर्हसि॥ **7.108.29**॥

किञ्चान्यद् वक्तुमिच्छामि राक्षसेन्द्र महाबल।
आराधय जगन्नाथमिक्ष्वाकुकुलदैवतम्॥ **7.108.30**॥

आराधनीयमनिशं देवैरपि सवासवैः।
तथेति प्रतिजग्राह रामवाक्यं विभीषणः॥ **7.108.31**॥

राजा राक्षसमुख्यानां राघवाज्ञामनुस्मरन्।
तमेवमुक्त्वा काकुत्स्थो हनूमन्तमथाब्रवीत्॥ **7.108.32**॥

जीविते कृतबुद्धिस्त्वं मा प्रतिज्ञां वृथा कृथाः।
मत्कथाः प्रचरिष्यन्ति यावल्लोके हरीश्वर॥ **7.108.33**॥

तावद् रमस्व सुप्रीतो मद्वाक्यमनुपालयन्।
एवमुक्तस्तु हनुमान् राघवेण महात्मना॥ **7.108.34**॥

वाक्यं विज्ञापयामास परं हर्षमवाप च।
यावत् तव कथा लोके विचरिष्यति पावनी॥ **7.108.35**॥

तावत् स्थास्यामि मेदिन्यां तवाज्ञामनुपालयन्।
जाम्बवन्तं तथोक्त्वा तु वृद्धं ब्रह्मसुतं तदा॥ **7.108.36**॥

मैन्दं च द्विविदं चैव पञ्च जाम्बवता सह।
यावत् कलिश्च सम्प्राप्तस्तावज्जीवत सर्वदा॥ **7.108.37**॥

**तानेवमुक्त्वा काकुत्स्थः सर्वांस्तानृक्षवानरान्।**
**उवाच बाढं गच्छध्वं मया सार्धं यथोदितम्॥ 7.108.38॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे अष्टाधिकशततमः सर्गः॥